
# भारतमुद्रा

(भारतमुद्रायाः विशिष्टः दैनिकसम्पुटः।)

## राज्यस्तरीयः स्कूल्-कलोत्सवः।

नववाण्याः संस्कृतभारत्याः संस्कृतवैखर्याः च सहयोगेन भारतमुद्रासम्पादकेन अशोकन् पुरनाट्टुकरामहोदयेन सम्पादितः प्रकाशितश्च ।



(सर्वम् उत्तरदायित्वं सम्पादके निक्षिप्तम्।)

RNI.44577/80

**अष्टविंशत्तमः संस्कृतोत्सवः समारब्धः**

**५२ त्तम स्कूल् कलोत्सवेन सह ।**

एषिया भूखण्डस्य उच्चतमयुवजनोत्सवरूपेण अङ्गीकृतस्य केरलराज्यस्य स्कूल्-लोत्सवस्य समुद्घाटनं समभवदद्य श्रीशिवपुरस्य

राजकीयाङ्कणे तत्प्रौढ्या निर्मिते मण्डपे, न केवलं केरलीयानां परन्तु समस्तस्यापि भारतीयानां हृदयावर्जक– स्वरसान्निध्यरूपेण पद्मभूषणोपाधियुता डो. के.जे. येशुदास् महोदयेन ।

“अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च सहकारः" इतिवत् अङ्कुरिताभ्यः प्रतिभाभ्यः प्रतिभेभ्यो वा उचिततमम् उन्नेतुं कृतपरिश्रमस्यास्य महानुभावस्य वैभवं वर्णनातीतम्।

यद्यपि मुख्यमन्त्रिणा समारोहस्यास्य उद्घाटनं प्रोद्घुष्टमासीत् तथापि तस्याभाव एव सर्वैः काङ्क्षितं समुद्घाटनं सर्वदेन सुपुत्रेण येशुदासमहोदयेन सम्पन्नम्।

त्रयोदशसहस्राधिकैः छात्रैः कृता शोभायात्रा अर्थत एव सांस्कृतिकीम् अमुं नगरं रोमाञ्चयति स्म। समस्तस्यापि भारतस्य विविधकलारूपाणि दैनन्दिनजीवनसमस्याश्च दृश्य–श्रव्यादयः कलाविभवाः आचाराधिष्ठिताः अपूर्वदृश्याः एन्डोसल्फान् दुरितबाधितानां क्लेशाः, भोपालदुरन्तं इत्यादीनि; न केवलं तत् – अत्यन्ताधुनिकं भित्ति–वीथिसमस्याश्च चलन्निश्चलरूपैः छात्रैः प्रदर्शितं सर्वमपि न केवलं जननीनाम् अपि तु सर्वेषामपि इन्द्रियवतां श्रद्धाम् आचकर्ष।

## परीवादाः ।

सामान्यतः राज्यस्तरीयकलोत्सवेषु दूरदेशादागच्छद्भ्यः अध्यापकसंघनेतृभ्यः आवासव्यवस्थां समायोजयन्ति स्म तत्संघाटकाः। अस्मिन् वर्षे तन्न आयोजितमस्ति।

यदायं प्रश्नः उन्नीतः तदा उत्तरम् अतिलघु आसीत् – "अतीतवर्षे नासीत् तादृशी योजना" इति।

आसीद्वा न वा! नगरे विद्यमानानि सर्वाणि आवासस्थानानि कलोत्सवार्थं सर्वकारीयमपि सम्मर्द्दमुपयुज्य "आवासव्यवस्थासमितिः"(Accomodation Committee) स्वकीयान्यकुर्वन्। अतः शेतुं किमपि आस्थानं अलब्ध्वा रेलनिस्थानेषु

बस्निस्थानेषु बान्धवगृहेषु किं बहुना स्पर्धावेदिकास्वपि कालरात्रिं नेतुम् अभिशप्ताः अभवन् राज्यस्तरीयाः संस्कृताध्यापकनेतारः। एते तु समारोहस्यास्य संघाटकसमित्यङ्गाश्च।
“विनष्टस्वावासाः अध्यापकलोकः।"

# विना भक्षणं कथं वा शिक्षणम्।

"प्रथमं भक्षणमार्जय ततः परं विज्ञानम्।" इतीदं वाक्यं नैव अस्माकं साधारणानाम्। " बुभुक्षिते उदरे न विद्या चकास्ती"ति भारतीययुवत्वस्य प्रतिनिधिना विवेकानन्दस्वामिना उद्घुष्टम्।

विभिन्नजिल्लाभ्यः अद्यैव प्राप्तानां छात्राणां भोजनाय व्यवस्था अपर्याप्ता सञ्जाता। भोजनचिटिका सर्वेषां छात्राणां कृते न दत्ता। अद्य कार्यक्रमः येषां वर्तते तेषां कृते एव भोजनव्यवस्था अस्तीति अधिकृतैः उक्तम्। अतः बहूनां स्पर्धालूनां मत्सरार्थिनां बहिस्थाः भोजनशालाः एव आश्रयाः अभवन्। एषा अवस्था प्रथमं तृशूर् जिल्लायामेव अभवदिति आतिथेयानां लज्जाकरम्।

# हन्त! कार्यदक्षता।

मध्याह्ने द्विवादने सिद्धाः शोभायात्रिकाः तैः कुत्र स्थातव्या इति अज्ञात्वा क्लेशमनुभूतवन्तः। घोषयात्रायाः उत्तरदायिनः अधिकारिणः सम्यक् गृहपाठं न कृतवन्तः इति स्पष्टम्। द्विवादने आरब्धुमुद्घुष्टा घोषयात्रा सार्धत्रिवादने एव समारब्धा। हन्त! कार्यदक्षता अधिकारिणाम्।